॥ श्रीः ॥

॥ श्रीमते रामानुजाय नमः ॥

॥ श्रीरामानुजस्तोत्ररत्नावली ॥

An Anthology on Bhagavad Ramanuja



jointly Published by

Ranjani 'Sujatha'
503/504, 4th Block Jayanagar, Bangalore-560011
and
Sri Shankara Jayanthi Mandali 45, 16th cross 3rd Block,
Jayanagar, Bangalore-560011
On the Occasion of the 16th Shashtyabdapoorthy and
961st Birthy Day Celebrations of Bhagawan
SRI RAMANUJA

Contribution 24-4-1977 **Rs. 2-00**

INDEX

I. SANSKRIT SECTION

S. No.	Title	Page No.
1.	श्रीरामानुजवैभवहेतुश्लोकः	1
2.	श्रीरामानुजस्तुतिश्लोकाः	3
3.	धाटीपञ्चकम्	5
4.	श्रीरामानुजचतुःश्लोकी	7
5.	रामानुजाष्टोत्तरशतनामस्तोत्रम्	9
6.	रामानुजस्तुतिपद्यानि	14
7.	यतिराजभारतीस्तुतिपद्यानि	16
8.	श्रीभाष्यकारस्तुतिश्लोकाः	18
9.	यतिराजसप्ततिः	20
10.	अवतारश्लोकः	39
11.	यतिराजविजयश्लोकाः	40
12.	यतिराजविंशतिः	44
13.	श्रीरामानुजसुप्रभातम्	50
14.	श्रीभाष्यकारमङ्गलम्	55
15.	श्रीरामानुजवर्णनाश्लोकाः	59
16.	प्रार्थनापञ्चकम्	62
17.	श्रीरामानुजस्तवश्लोकाः	63
18.	यतिपतिषण्णवतिः	66

2. Enqlish Section

S. No.	Title	Page No.
1.	Ramanuja Vaibhava Hetu Sloka	1
2	Sri Ramanuja Stuti Slokas	2
3.	Dhaati Panchakam	3
4.	Ramanuja Chatu Sloki	5
5.	Ramanuja Ashottara Satanama Stotra	6
6.	Ramnuja Stuti Padyani	12
7.	Yatiraja Bharati Stuti Padyani	13
8.	Bhashyakara Stotra	14
9.	Yatiraja Saptati	15
10.	Avatara Sloka	29
11.	Yatiraja Vijaya Slokas	30
12.	Yatiraja Vimsati	33
13.	Sri Ramanuja Suprabhatam	38
14.	Sri Bhashyakara Mangalam	41
15.	Sri Ramanuja Varnana Slokas	44
	Prarthana Panchakam	46
,,	Sri Ramanuja Stava Slokas	47
18.	Yatipati Shannavati	49

3. Pooja Section

S. No.	Title	Page No.
1.	श्रीरामानुजाष्टोत्तरशतनामावलिः	
2.	निगमनश्लोकाः	

॥ श्रीः ॥

॥ श्रीमते रामानुजाय नमः ॥

॥ श्रीरामानुजस्तोत्ररत्नावली ॥

An Anthology on Bhagavad Ramanuja



Published by

Sri Shankara Jayanthi Mandali

BANGALORE.

In Commemoration of the 16th Shastyabdapoorthy
and 961 st Tirunakshattiram

OF

Bhagawan Sri Ramanuja

Price : 24-4-1997 Rs. 2-00

INDEX

I. SANSKRIT SECTION

S. No.	Title	Page No.
1.	श्रीरामानुजवैभवहेतुश्लोकः	1
2.	श्रीरामानुजस्तुतिश्लोकाः	3
3.	घाटीपञ्चकम्	5
4.	श्रीरामानुजचतुःश्लोकी	7
5.	रामानुजाष्टोत्तरशतनामस्तोत्रम्	9
6.	रामानुजस्तुतिपद्यानि	14
7.	यतिराजभारतीस्तुतिपद्यानि	16
8.	श्रीभाष्यकारस्तुतिश्लोकाः	18
9.	यतिराजसप्ततिः	20
10.	अवतारश्लोकः	39
11.	यतिराजविजयश्लोकाः	40
12.	यतिराजविंशतिः	44
13.	श्रीरामानुजसुप्रभातम्	50
14	श्रीभाष्यकारमङ्गलम्	55
15.	श्रीरामानुजवर्णनाश्लोकाः	59
16.	प्रार्थनापञ्चकम्	62
17.	श्रीरामानुजस्तवश्लोकाः	63
18.	यतियतिपञ्चवातिः	66

2. Enqlish Section

S. No.	Title	Page No.
1.	Ramanuja Vaibhava Hetu Sloka	1
2.	Sri Ramanuja Stuti Slokas	2
3.	Dhaati Panchakam	3
4.	Ramanuja Chatu Sloki	5
5.	Ramanuja Ashottara Satanama Stotra	6
6.	Ramnuja Stuti Padyani	12
7.	Yatiraja Bharati Stuti Padyani	13
8.	Bhashyakara Stotra	14
9.	Yatiraja Saptati	15
10.	Avatara Sloka	29
11.	Yatiraja Vijaya Slokas	30
12.	Yatiraja Vimsati	33
13.	Sri Ramanuja Suprabhatam	38
14.	Sri Bhashyakara Mangalam	41
15.	Sri Ramanuja Varnana Slokas	44
16.	Prarthana Panchakam	46
17.	Sri Ramanuja Stava Slokas	47
18.	Yatipati Shannavati	49

3. Pooja Section

S. No.	Title	Page No.
1.	श्रीरामानुजाष्टोत्तरशतनामावलिः	1
2.	निगमनश्लोकाः	7

॥ श्रीः ॥



॥ श्रीभगवद्रामानुजस्वामिपादाः ॥

॥ श्रीमते रामानुजाय नमः ॥

॥ श्रीः ॥

॥ श्रीमते रामानुजाय नमः ॥

॥ श्रीवात्स्यवरदविष्णुमहागुरवे नमः ॥

श्रीवरदविष्णुमहागुरुभिरनुगृहीतः

॥ [1]श्रीरामानुजवैभवहेतुश्लोकः ॥

यस्मिन् पदं यतिवरस्य मुखात् प्रणेतुः
निष्कामदेव विदधे निगमान्तभाष्यम्
तस्यैव तं भगवतः प्रियभागिनेयं
वंदामहे वरदविष्णुपदाभिधेयम् ॥

---

[1] कदाचित् श्रीरामानुजपदाश्रयाः विद्वांसः 'श्रीभगवद्रामानुजस्य महिम्नः को हेतुः ?' इति श्रीभगवद्रामानुजप्रियभागिनेयं (श्रीभगवद्रामानुजमुनेः कनीयस्याः भगिन्याः कमलानाम्न्याः कुमारं) 'सत्कुर्वता संसदि शिष्यवर्गान् अनन्यलभ्यैरखिलैः स्वचिह्नैः। श्रीभाष्यसिंहासनमात्मनीनं यस्मै च दत्तं यतिशेखरेण ॥' इत्यादिकविगिरा वर्ण्यमानविभवं श्रीवात्स्यवरदविष्णवार्यमहागुरुं अपृच्छन् । तदानीं तेन अनेन श्लोकेन तेषामुत्तरमुक्तमिति संप्रदायविदः ॥


श्रीमद्रङ्गपतिश्च वेङ्कटपतिः श्रीवारणाद्रेः पतिः
श्रीयद्वद्रिपतिश्च केचन तथा दिव्यस्थलाधीश्वराः ।
आचार्यश्च स यामुनो मुनिवरः श्रीशैलपूर्णस्तथा
श्रीरामानुजसंयमीन्द्रगुरवे तादृक्प्रसादं ददुः ॥ १

-:o:-

॥ इति श्रीवरदविष्णुमहागुरुभिरनुगृहीतः
श्रीरामानुजवैभवहेतुश्लोकः ॥



श्रुत्यन्तद्वयपीठदेशिकमणिः श्रीवत्सवंशाग्रणीः
श्रीरामानुजभागिनय इति यः ख्यातः क्षमामण्डले ।
स श्रीहस्तिगिरीशसेवनपरः प्रत्यस्तबाह्यागमः
माहाकारुणिकैर्गुणैः वरदविष्ण्वाख्योचितैरेधते ॥



॥ श्रीवात्स्यवरदविष्णुमहागुरवे नमः ॥

॥ श्रीः ॥

॥ श्रीमते रामानुजाय नमः ॥

॥ श्रीश्रीवत्सचिह्नमिश्रेभ्यो नमः ॥

श्रीश्रीवत्सचिह्नमिश्रैः अनुगृहीताः

॥ श्रीरामानुजस्तुतिश्लोकाः ॥

श्रीवत्सचिह्नमिश्रेभ्यो नम उक्तिमधीमहे ।
यदुक्तयस्त्वयीकण्ठे यान्ति मङ्गलसूत्रताम् ॥



यो नित्यमच्युतपदांबुजयुग्मरुक्म-
व्यामोहतस्तदितराणि तृणाय मेने ।
अस्मद्गुरोर्भगवतोऽस्य दयैकसिन्धोः
रामानुजस्य चरणौ शरणं प्रपद्ये ॥ १

(श्रीवैकुण्ठस्तवे प्रथमः श्लोकः ।)

श्रीमन्तौ हरिचरणौ समाश्रितोऽहं
श्रीरामावरजमुनीन्द्रलब्धबोधः ।

निर्भीकस्तत इह सुन्दरोरुबाहुं
स्तोष्ये तच्चरणविलोकनाभिलाषी ॥ २

(श्रीसुन्दरबाहुस्तवे प्रथमः श्लोकः)

विज्ञापनां वनगिरीश्वर ! सत्यरूपां
अङ्गीकुरुष्व करुणार्णव ! मामकीनाम् ।
श्रीरङ्गधामनि यथापुरमेकतोऽहं
रामानुजार्यवशगः परिवर्तिषीय ॥ ३

(श्रीसुन्दरबाहुस्तवे 129-तमः श्लोकः ।)

रामानुजांघ्रिशरणोऽस्मि कुलप्रदीपः
त्वासीत् स यामुनमुनेः स च नाथवंश्यः ।
वंश्यः पराङ्कुशमुनेः स च सोऽपि देव्याः
दासस्तवेति वरदास्मि तवेक्षणीयः ॥ ४


(श्रीवरदराजस्तवे 102-तमः श्लोकः ।)



श्रीश्रीवत्सचिह्नमिश्रैरनुगृहीताः
॥ श्रीरामानुजस्तुतिश्लोकाः ॥



अर्वाञ्चो यत्पदसरसिजद्वन्द्वमाश्रित्य पूर्वे
मूर्ध्ना यस्यान्वयमुपगता देशिका मुक्तिमापुः ।
सोऽयं रामानुजमुनिरपि स्वीयमुक्तिं करस्थां
यत्संबन्धादमनुत कथं वर्ण्यते कूरनाथः ॥



॥ श्रीश्रीवत्सचिह्नमिश्रेभ्यो नमः ॥

॥ श्रीः ॥

॥ श्रीमते रामानुजाय नमः ॥

श्रीश्रीवत्सचिह्नमिश्रादिभिरनुगृहीतमिति प्रथितं

॥ धाटीपञ्चकम् ॥



पाषण्डद्रुमषण्डदावदहनः चार्वाकशैलाशनिः
बौद्धध्वान्तनिरासवासरपतिः जैनेभकण्ठीरवः ।
मायावादिभुजङ्गभङ्गगरुडः त्रैविद्यचूडामणिः
श्रीरङ्गेशजयध्वजो विजयते रामानुजोऽयं मुनिः ॥ १

पाषण्डषण्डगिरिखण्डनवज्रदण्डाः
प्रच्छन्नबौद्धमकरालयमन्थदण्डाः ।
वेदान्तसारसुखदर्शनदीपदण्डाः
रामानुजस्य विलसन्ति मुनेस्त्रिदण्डाः ॥ २

चारित्रोद्धारदण्डं चतुरनयपथालंक्रियाकेतुदण्डं
सद्विद्यादीपदण्डं सकलकलिकथासंहतेः कालदण्डम् ।

त्रय्यन्तालम्बदण्डं त्रिभुवनविजयच्छत्रसौवर्णदण्डं
धत्ते रामानुजार्यः प्रतिकथकशिरोवज्रदण्डं त्रिदण्डम् ॥ ३

त्रय्या मङ्गल्यसूत्रं त्रियुगपदयुगारोहणालम्बसूत्रं
सद्विद्यादीपसूत्रं सकलकलिकथासंहतेः कालसूत्रम् ।
प्रज्ञासूत्रं बुधानां प्रशमधनमनःपद्मिनीनालसूत्रं
रक्षासूत्रं मुनीनां जयति यतिपतेः वक्षसि ब्रह्मसूत्रम् ॥ ४

पाषण्डसागरमहाबडबामुखाग्निः
श्रीरङ्गराजचरणांबुजमूलदासः ।
श्रीविष्णुलोकमणिमण्डपमार्गदायी
रामानुजो विजयते यतिराजराजः ॥ ५

॥ इति श्रीश्रीवत्साचिह्नमिश्रादिभिरनुगृहीतामिति प्रथितं
घाटीपञ्चकम् ॥

॥ श्रीमते रामानुजाय नमः ॥

॥ श्रीः ॥

॥ श्रीमते रामानुजाय नमः ॥

॥ श्रीशैलानन्तपुरुषगुरवे नमः ॥

श्रीशैलानन्तपुरुषगुरुभिरनुगृहीता

॥ श्रीरामानुजचतुः श्लोकी ॥

अनिशं भजतामनन्यभाजां
चरणाम्भोरुहमादरेण पुंसाम् ।
वितरन्निभृतं विभूतिमिष्टां
जय रामानुज ! रङ्गधाम्नि नित्यम् ॥ १

भुवि नो विमतांस्त्वदीयसूक्तिः
कुलिशीभूय कुदृष्टिभिस्समेतान् ।
शकलीकुरुते विपश्चिदीड्या
जय रामानुज ! शेषशैलशृङ्गे ॥ २

श्रुतिषु स्मृतिषु प्रमाणतत्त्वं
कृपयालोक्य विशुद्धया हि बुद्धया ।

अकुथाः स्वत एव भाष्यरत्नं
जय रामानुज ! हस्तिधाम्नि नित्यम् ॥ ३

जय मायिमतान्तकारभानो !
जय बाह्यप्रमुखाटवीकृशानो ! ।
जय संश्रितसिन्धुशीतभानो !
जय रामानुज ! यादवाद्रिशृङ्गे ॥ ४

रामानुजचतुःश्लोकीं यः पठेन्नियतस्सदा ।
प्राप्नुयात् परमां भक्तिं यतिराजपदाब्जयोः ॥ ५

॥ इति श्रीशैलानन्तपुरुषगुरुभिरनुगृहीता
श्रीरामानुजचतुःश्लोकी ॥

॥ श्रीशैलानन्तपुरुषगुरवे नमः ॥

॥ श्रीः ॥

॥ श्रीमते रामानुजाय नमः ॥

॥ श्रीमदान्ध्रपूर्णगुरवे नमः ॥

श्रीमदान्ध्रपूर्णैरनुगृहीतं

॥ रामानुजाष्टोत्तरशतनामस्तोत्रम् ॥

श्रीरामानुजयोगीन्द्रक्षीरकैङ्कर्यशालिने ।
नमो वटुकपूर्णाय महनीयगुणाब्धये ॥



रामानुजः पुष्कराक्षः यतीन्द्रः करुणाकरः ।
कान्तिमत्यात्मजः श्रीमान् लीलामानुषविग्रहः ॥ १

सर्वशास्त्रार्थतत्वज्ञः सर्वज्ञः सज्जनप्रियः ।
नारायणकृपापात्रं श्रीभूतपुरनायकः ॥ २

अनघो भक्तमन्दारः केशवानन्दवर्धनः ।
काञ्चीपूर्णप्रियसखः प्रणतार्तिविनाशनः ॥ ३

पुण्यसङ्कीर्तनः पुण्यः ब्रह्मराक्षसमोचकः ।
यादवापादितापार्थवृक्षच्छेदकुठारकः ॥ ४

अमोघो लक्ष्मणमुनिः शारदाशोकनाशनः ।
निरन्तरजनाज्ञाननिर्मोचनविचक्षणः ॥ ५

वेदान्तद्वयसारज्ञः वरदायाम्बुदायकः ।
पराभिप्रायतत्त्वज्ञः यामुनाङ्गुलिमोचनः ॥ ६

देवराजकृपालब्धषड्वाक्यार्थमहोदधिः ।
पूर्णार्यलब्धसन्मन्त्रः शौरिपादाब्जषड्पदः ॥ ७

त्रिदण्डधारी ब्रह्मज्ञः ब्रह्मज्ञानपरायणः ।
रङ्गेशकैङ्कर्यरतः विभूतिद्वयनायकः ॥ ८

गोष्ठीपूर्णकृपालब्धमन्त्रराजप्रकाशकः ।
वररङ्गानुकंपात्तद्राविडाम्नायपारगः ॥ ९

मालाधरार्यसुज्ञातद्राविडाम्नायतत्त्वधीः ।
चतुस्सप्ततिशिष्याढ्यः पञ्चाचार्यपदाश्रयः ॥ १०

प्रपीतविषतीर्थाम्भःप्रकटीकृतवैभवः ।
प्रणतार्तिहराचार्यदत्ताभिक्षैकभोजनः ॥ ११

पवित्रीकृतकूरेशः भागिनेयत्रिदण्डकः ।
कूरेशदाशरथ्यादिचरमार्थप्रदायकः ॥ १२

रङ्गेशवेङ्कटेशादिप्रकटीकृतवैभवः ।
देवराजार्चनरतः मूकमुक्तिप्रदायकः ॥ १३

यज्ञमूर्तिप्रतिष्ठाता मन्त्रदो धरणीधरः ।
वरदाचार्यसङ्कल्पः यज्ञेशार्तिविनाशकः ॥ १४

अनन्ताभीष्टफलदः विठलेन्द्रप्रपूजितः ।
श्रीशैलकरुणापूर्णलब्धरामायणार्थकः ॥ १५

व्याससूत्रार्थतत्त्वज्ञः बोधायनमतानुगः ।
श्रीभाष्यादिमहाग्रन्थकारकः कलिनाशनः ॥ १६

अद्वैतमतविच्छेत्ता विशिष्टाद्वैतपारगः ।
कुरङ्गनगरीपूर्णमन्त्ररत्नोपदेशकः ॥ १७

विनाशिताखिलमतः शेषीकृतरमापतिः ।
पुत्रीकृतशठारातिः शठारात्पृणमोचकः ॥ १८

भाषादत्तहयग्रीवः भाष्यकारो महायशाः ।
पवित्रीकृतभूभागः कूर्मनाथप्रकाशकः ॥ १९

श्रीवेङ्कटाचलाधीशशङ्खचक्रप्रदायकः ।
श्रीवेङ्कटेशश्वशुरः श्रीरमासखदेशिकः ॥ २०

कृपामात्रप्रसन्नार्यः गोपिकामोक्षदायकः ।
समीचीनार्यसच्छिष्यः सत्कृतो वैष्णवप्रियः ॥ २१

क्रिमिकण्ठनृपध्वंसी सर्वमन्त्रमहोदधिः ।
अङ्गीकृतान्ध्रपूर्णाख्यः सालग्रामप्रतिष्ठितः ॥ २२

श्रीभक्तग्रामपूर्णेशः विष्णुवर्धनरक्षकः ।
बौद्धध्वान्तसहस्रांशुः शेषरूपप्रदर्शकः ॥ २३

नगरीकृतवेदाद्रिः डिल्लीश्वरसमर्चितः ।
नारायणप्रतिष्ठाता संपत्पुत्रविमोचकः ॥ २४

संपत्कुमारजनकः साधुलोकशिखामणिः ।
सुप्रतिष्ठितगोविन्दराजः पूर्णमनोरथः ॥ २५

गोदाग्रजो दिग्विजेता गोदाभीष्टप्रपूरकः ।
सर्वसंशयविच्छेत्ता विष्णुलोकप्रदायकः ॥ २६

अव्याहतमहद्वर्त्मा यतिराजो जगद्गुरुः ।
एवं रामानुजार्यस्य नाम्नामष्टोत्तरं शतम् ॥
यः पठेत् श्रुणुयाद्वापि सर्वान् कामानवाप्नुयात् ॥ २७

यदान्ध्रपूर्णेन महात्मनेदं
स्तोत्रं कृतं सर्वजनावनाय ।
तज्जीवभूतं भुवि वैष्णवानां
बभूव रामानुजमानसानाम् ॥ २८

॥ इति श्रीमदान्ध्रपूर्णैरनुगृहीतं
रामानुजाष्टोत्तरशतनामस्तोत्रम् ॥

श्रीरामानुजयोगीन्द्रक्षीरकैंकर्यशालिने ।
नमो वटुकपूर्णाय महनीयगुणाब्धये ॥

॥ श्रीमदान्ध्रपूर्णगुरवे नमः ॥

॥ श्रीः ॥

॥ श्रीमते रामानुजाय नमः ॥

॥ श्रीपराशरभट्टारकेभ्यो नमः ॥

श्रीपराशरभट्टारकैरनुगृहीतानि

॥ रामानुजस्तुतिपद्यानि ॥



श्रीपराशरभट्टार्यः श्रीरङ्गेशपुरोहितः ।
श्रीवत्साङ्कसुतः श्रीमान् श्रेयसे मेऽस्तु भूयसे ॥



रामानुजमुनिर्जीयात् यो हरेर्भक्तियन्त्रतः ।
कलिकोलाहलक्रीडामुधाग्रहमपाहरत् ॥ १

(श्रीरङ्गराजस्तवे)

श्रीरङ्गं करिशैलमञ्जनगिरिं तार्क्ष्याद्रिसिंहाचलौ
श्रीकूर्मं पुरुषोत्तमं च बदरीनारायणं नैमिशम् ।
श्रीमद्वारवतीप्रयागमधुरायोध्यागयाः पुष्करं
सालग्रामगिरिं निषेव्य रमते रामानुजोऽयं मुनिः ॥ २

(श्रीरङ्गनाथस्तोत्रे)

पुरा सूत्रैर्व्यासः श्रुतिशतशिरोऽर्थं ग्रथितवान्
विवत्रे तं श्राव्यं वकुलधरतामेत्य स पुनः ।
उभावेतौ ग्रन्थौ घटयितुमलं युक्तिभिरसौ
नर्जज्ञे रामावरज इति स ब्रह्ममुकुरः ॥ ३

(मुक्तकश्लोकः)



इति श्रीपराशरभट्टारकैरनुगृहीतानि
॥ रामानुजस्तुतिपद्यानि ॥



श्रीपर शरभट्टार्यः श्रीरङ्गेशपुरोहितः ।
श्रीवत्साङ्कसुतः श्रीमान् श्रेयसे मेऽस्तु भूयसे ॥



॥ श्रीपराशरभट्टारकेभ्यो नमः ॥

॥ श्रीः ॥

॥ श्रीमते रामानुजाय नमः

॥ श्रीमते वात्स्यवरददेशिकाय नमः ॥

श्रीवात्स्यवरदगुरुभिरनुगृहीतानि

॥ यतिराजभारतीस्तुतिपद्यानि ॥



वन्देऽहं वरदार्यं तं वत्साभिजनभूषणम् ।
भाष्यामृतप्रदानाद्यः संजीवयति मामपि ॥

क्व पथि विदुषामेषा प्रौढी श्रियः प्रभुणा शपे
मशकशकनं मन्ये मादृक्प्रभावनिदर्शनम्
यतिवरवचस्तेजः प्रत्यार्थिवर्गनिरर्गल ।
क्षपणनिपुणं नित्यं जागर्ति कीर्तिकरं मयि ॥ १

न खलु कवितामानः का नः क्षतिः पथि गौतमे
न च परिचयः काणादे वा कुमारिलदर्शने ।
अपि गुरुमते शास्त्रेष्वन्येष्वपीह तथाऽपि नः
फलति विजयं सर्वत्र श्रीयतीश्वरगीश्श्रमः ॥ २

यश्चकार यतिराजभारती-

चित्तवृत्तिषु परं परिश्रमम् ।

तस्य वैदिकसदश्शिखामणेः

अग्रतः क्व परवादिसंभवः ॥ ३

(श्रीतत्त्वसारे)

-:o:-

इति श्रीवात्स्यवरदगुरुभिरनुगृहीतानि

॥ यतिराजभारतीस्तुतिपद्यानि ॥

यद्दृष्ट्या निगमान्तदेशिकमणिः लक्ष्मीहयास्यास्पदं
यद्वंश्याश्रयणाच्छठारिमुनिराट् लक्ष्मीनृसिंहास्पदम् ।
यं देवः करिशैलमौलिनिलयः प्राह स्वयं मातरं
सः श्रीवत्सगुरुः करोतु सततं भद्रं सुभद्राकृतिः ॥

॥ श्रीमते वात्स्यवरददेशिकाय नमः ॥

॥ श्रीः ॥

॥ श्रीमते रामानुजाय नमः ॥
॥ श्रीमते सुदर्शनसूरये नमः ॥

श्रीसुदर्शनसूरिभिरनुगृहीताः

॥ श्रीभाष्यकारस्तुतिश्लोकाः ॥

यतीन्द्रकृतभाष्यार्था यद्व्याख्यानेन दर्शिताः ।
व्यासं सुदर्शनार्यं तं वन्दे कूरकुलाधिपम् ॥

तस्मै रामानुजार्याय नमः परमयोगिने ।
यः श्रुतिस्मृतिसूत्राणां अन्तर्ज्वरमशीशमत् ॥ १

प्रपद्ये प्रणवाकारं भाष्यं रङ्गमिवापरम् ।
परस्य ब्रह्मणो यत्र शेषित्वं स्फुटमीक्ष्यते ॥ २

अविस्तृतास्सुगम्भीराः रामानुजमुनेर्गिरः ।
दर्शयन्तु प्रसादेन स्वं भावमखिलं दृढम् ॥ ३

भाष्यं चेत् व्यवृणोत् स्वयं यतिपतिः व्याख्यानवाचां तथा
गाम्भीर्यादनवस्थितिः मितमतिर्दूरे जनस्तद्गिराम् ।

प्रष्टव्यः कथमीश्वरः स हि न नः प्रत्यक्षरूपो दृशाम्
तद्भाष्यं स च भाष्यकृत् स च हरिः संयक् प्रसीदन्तु नः ॥ ४

(श्रुतप्रकाशिकायाम्)

॥ इति श्रीसुदर्शनसूरिभिरनुगृहीताः
श्रीभाष्यकारस्तुतिश्लोकाः ॥

यतीन्द्रकृतभाष्यार्था यद्वचाख्यानेन दर्शिताः ।
व्यासं सुदर्शनार्यं तं वन्दे कूरकुलाधिपम् ॥

॥ श्रीमते सुदर्शनसूरये नमः ॥

॥ श्रीः ॥

॥ श्रीमते रामानुजाय नमः ॥

॥ श्रीमते निगमान्तमहादेशिकाय नमः ॥

श्रीनिगमान्तगुरुभिरनुगृहीता

॥ यतिराजसप्ततिः ॥



श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्तचार्यवर्यो मे संनिधत्तां सदा हृदि ॥



कमप्याद्यं गुरुं वन्दे कमलागृहमेधिनम् ।
प्रवक्ता छन्दसां वक्ता पञ्चरात्रस्य यः स्वयम् ॥ १

सहधर्मचरीं शौरेः संमन्त्रितजगद्धिताम् ।
अनुग्रहमयीं वन्दे नित्यमज्ञातनिग्रहाम् ॥ २

वन्दे वैकुण्ठसेनान्यं देवं सूत्रवतीसखम् ।
यद्वेत्रशिखरस्पन्दे विश्वमेतद् व्यवस्थितम् ॥ ३

यस्य [1]सारस्वतस्रोतो वकुलामोदवासितम् ।
श्रुतीनां विश्रमायालं शठारिं तमुपास्महे ॥ ४

नाथेन मुनिना [2]तेन भवेयं नाथवानहम् ।
यस्य नैगमिकं तत्त्वं हस्तामलकतां गतम् ॥ ५

नमस्याम्यरविन्दाक्षं नाथभावे व्यवस्थितम् ।
शुद्धसत्त्वमयं शौरेरवतारमिवापरम् ॥ ६

अनुज्झितक्षमायोगमपुण्यजनबाधकम् ।
[3]अस्पृष्टमदिरागन्धं रामं तुर्यमुपास्महे ॥ ७

विगाहे यामुनं तीर्थं साधुवृन्दावने स्थितम् ।
निरस्तजिह्मगस्पर्शे यत्र कृष्णः कृतादरः ॥ ८

दयानिघ्नं यतीन्द्रस्य देशिकं पूर्णमाश्रये ।
येन विश्वसृजो विष्णोरपूर्यत मनोरथः ॥ ९

प्रणामं लक्ष्मणमुनिः प्रतिगृह्णातु मामकम् ।
प्रसाधयति यत्सूक्तिः स्वाधीनपतिकां श्रुतिम् ॥ १०

---

1 सारस्वतं स्रोतो 2 मुनिनाथेन 3 अस्पृष्टमदरागं

उपवीतिनमूर्ध्वपुण्ड्रवन्तं
त्रिजगत्पुण्यफलं त्रिदण्डहस्तम् ।
शरणागतसार्थवाहमीडे
शिखया शेखरिणं पतिं यतीनाम् ॥ ११

प्रथयन् विभतेषु तीक्ष्णभावं
प्रभुरस्मत्परिरक्षणे यतीन्द्रः ।
अपृथक्प्रतिपन्नयन्मयत्वैः
ववृधे पञ्चभिरायुधैर्मुरारेः ॥ १२

शमितोदयशङ्करादिगर्वः
स्वबलादुद्धृतयादवप्रकाशः ।
अवरोपितवान् श्रुतेरपार्थान्
ननु रामावरजः स [1]एष भूयः ॥ १३

अबहुश्रुत संभवं श्रुतीनां
ज्वरतीनामयथायथ प्रचारम् ।
विनिवर्तयितुं यतीश्वरोक्तिः
विदधे ताः स्थिरनीतिपञ्जरस्थाः ॥ १४

---

1 एव

अमुना तपनातिशायिभूम्ना
यतिराजेन निबद्धनायकश्रीः।
महती गुरुपङ्क्तिहारयष्टिः
विबुधानां हृदयङ्गमा विभाति ॥ १५

अलूनपक्षस्य यतिक्षमाभृतो
विभाति वंशे हरितत्त्वमक्षतम् ।
यदुद्भवाः शुद्धसुवृत्तशीतलाः
भवन्ति मुक्तावलिभूषणं भुवः ॥ १६

अनपायविष्णुपदसंश्रयं भजे
कलया कयाऽपि कलयाऽप्यनुज्झितम् ।
[1]अकलङ्कयोगमजडाशयोदयं
यतिराजचन्द्रमुपरागदूरगम् । १७

अभिगम्य सम्यगनघाः सुमेधसो
यतिचक्रवर्तिपदपद्मपत्तनम् ।
हरिभक्तदास्यरसिकाःपरस्परं
क्रयविक्रयार्हदशयाः समिन्धते ॥ १८

---

[1] अकलङ्कयोगमजडाशयोदितं

परुषातिवादपरिवादपैशुन-
प्रभृतिप्रभूतपतनीयपङ्किला ।
स्वदते ममाद्य सुभगा सरस्वती
यतिराजकीर्तिकतकैर्विशोधिता ॥ १९

अनुकल्पभूतमुरभित्पदं सतां
अजहत्त्रिवर्गमपवर्गवैभवम् ।
चलचित्तवृत्तिविनिवर्तनौषधं
शरणं यतीन्द्रचरणं वृणीमहे ॥ २०

श्वसितावधूतपरवादिवैभवाः
निगमान्तनीतिजलधेस्तलस्पृशः ।
प्रतिपादयन्ति गतिमापवर्गिकीं
यतिसार्वभौमपदसात्कृताशयाः ॥ २१

मूले निविश्य महतां निगमद्रुमाणां
मुष्णन् प्रतारकभयं धृतनैकदण्डः ।
रङ्गेशभक्तजनमानसराजहंसो
रामानुजः शरणमस्तु मुनिः स्वयं नः ॥ २२

सन्मन्त्रवित् क्षिपति संयमिनां नरेन्द्रः
संसारजिह्मगमुखैः समुपस्थितं नः ।

विष्वक्कृतं विषयलोभविषं निजाभिः
गाढानुभावगरुडध्वजभावनाभिः ॥ २३

नाथः स एष यमिनां नखरश्मिजालैः
अन्तर्निलीनमपनीय तमो मदीयम् ।
विज्ञानचित्रमनघं लिखतीव चित्ते
व्याख्यानकेलिरसिकेन करांबुजेन ॥ २४

उद्गृह्णतीमुपनिषत्सु निगूढमर्थं
चित्ते निवेशयितुमल्पधियां स्वयं नः ।
पश्येम लक्ष्मणमुनेः प्रतिपन्नहस्ताम्
उन्निद्र[1]पद्मसुभगामुपदेशमुद्राम् ॥ २५

आकर्षणानि निगमान्तसरस्वतीनां
उच्चाटनानि बहिरन्तरुपप्लवानाम् ।
पथ्यानि घोरभवसंज्वरपीडितानां
हृद्यानि भान्ति यतिराजमुनेर्वचांसि ॥ २६

शीतस्वभावसुभगानुभवः शिखावान्
दोषावमर्दनियतोन्नतिरोषधीशः ।

---

1 सत्त्व

तापानुबन्धशमनस्तपनः प्रजानां
रामानुजो जयति संवलितत्रिधामा ॥ २७

जयति सकलविद्यावाहिनीजन्मशैलो
जनिपथपरिवृत्तिश्रान्तविश्रान्तिशाखी ।
निखिलकुमतिमायाशर्वरीबालसूर्यो
निगमजलधिवेलापूर्णचन्द्रो यतीन्द्रः ॥ २८

मुनिबहुमतसारा मुक्तिनिश्रेणिकेयं
सहृदयहृदयानां शाश्वती दिष्टसिद्धिः ।
[1]शमितदुरितगन्धा संयमीन्द्रस्य सूक्तिः
परिचितगहना नः प्रस्नुवीत प्रसादम् ॥ २९

भवमरुपरिखिन्नस्फीतपानीय[2]सिन्धुः
दुरितरहितजिह्वादुग्धकुल्यासकुल्या ।
श्रुतिनयनसनाभिः शोभते लक्ष्मणोक्तिः
नरकमथनसेवास्वादनाडिंधमा नः ॥ ३०

हरिपदमकरन्दस्यन्दिनः संश्रितानां
अनुगतबहुशाखास्तापमुन्मूलयन्ति ।

---

[1] शमितविमतखेदा [2] सिद्धिः

शमितदुरितगन्धाः संयमीन्द्रप्रबन्धाः
कथकजनमनीषाकल्पनाकल्पवृक्षाः ॥ ३१

नानाभूतैर्जगति समयैर्नर्मलीलां विधित्सोः
अन्त्यं वर्णं प्रथयति विभोरादिमव्यूहभेदे[1] ।
विश्वं त्रातुं विषयनियतं व्यञ्जितानुग्रहः सन्
विष्वक्सेनो यतिपतिरभूद् वेत्रसारस्त्रिदण्डः ॥ ३२

लक्ष्यं बुद्धे रसिकरसनालास्यलीलानिदानं
शुद्धास्वादं किमपि जगति श्रोत्रदिव्यौषधं नः ।
लक्ष्यालक्ष्यैः सितजलधिवद्भाति तात्पर्यरत्नैः
लक्ष्मीकान्तस्फाटिकमुकुरो लक्ष्मणार्योपदेशः ॥ ३३

स्थितिमवधीरयन्त्यातिमनोरथसिद्धिमतीं
यातिपतिसंप्रदायनिरपायधनोपचिताः ।
मधुकरमौलिदघ्नमददन्तुरदन्तिघटा-
करटकटाहवाहिघनशीकर [2]शीभरिताम् ॥ ३४

निरुपधिरङ्गवृत्तिरसिकानभिताण्डवयन्
निगमविमर्शकेलि[3]रसिकैर्निभृतैर्विधृतः ।

---

1 भेदैः 2 शीफरिताम् 3 निरतैः

गुणपरिणद्धसूक्तिदृढकोणविघट्टनया
रटति दिशामुखेषु यतिराजयशःपटहः ॥ ३५

इदं प्रथमसंभवत्कुमतिजालकूलङ्कषा
मृषामतविषानलज्वलितजीवजीवातवः ।
क्षरन्त्यमृतमक्षरं यतिपुरन्दरस्योक्तयः
चिरन्तनसरस्वतीचिकुरबन्धसैरन्ध्रिकाः ॥ ३६

सुधाशनसुदुर्ग्रहश्रुतिसमष्टिमुष्टिन्धयः
कथाहवमसौ गतान् कपटसौगतान् खण्डयन् ।
मुनिर्मनसि लक्ष्मणो मुदमुदञ्चयत्यञ्जसा
मुकुन्दगुणमौक्तिकप्रकरशुक्तिभिः सूक्तिभिः ॥ ३७

कपर्दिमतकर्दमं कपिलकल्पनावागुरां
दुरत्ययमतीत्य तद्दुहिणतन्त्रयन्त्रोदरम् ।
कुदृष्टिकुहनामुखे निपततः परब्रह्मणः
करग्रहविचक्षणो जयति लक्ष्मणोऽयं मुनिः ॥ ३८

कणादपरिपाटिभिः कपिलकल्पनानाटकैः
कुमारिलकुभाषितैर्गुरुनिबन्धनग्रन्थिभिः ।

तथागतकथाशतैस्तदनुसारिजल्पैरपि
प्रतारितमिदं जगत् प्रगुणितं यतीन्द्रोक्तिभिः ॥ ३९

कथाकलहकौतुकग्रहीतकौतस्कुत-
प्रथाजलधिसंप्लवग्रसनकुम्भसम्भूतयः ।
जयन्ति सुधियो [1]यतिक्षितिभृदन्तिकोपासना-
प्रभावपरिपाकित्रमप्रमितिभारतीसंपदः ॥ ४०

यतीश्वरसरस्वतीसुरभिताशयानां सतां
वहामि चरणाम्बुजं प्रणतिशालिना मौलिना ।
तदन्यमतदुर्मदज्वलितचेतसां वादिनां
शिरस्सु निहितं मया पदमदक्षिणं लक्ष्यताम् ॥ ४१

भजस्व यतिभूपतेरनिदमादिदुर्वासना-
कदध्वपरिवर्तनश्रमनिवर्तनीं वर्तनीम् ।
लभस्व हृदय स्वयं रथपदायुधानुग्रह-
द्रुतप्रहृतिनिस्त्रुटद्दुरितदुर्वृतिं निर्वृतिम् ॥ ४२

कुमतिविहितग्रन्थग्रन्थिप्रभूतमतान्तर-
ग्राहिलमनसः पश्यन्त्वल्पां यतीश्वरभारतीम् ।

---

[1] यतिक्षितिभृदन्तिकोपासनप्रभाव

विकटमुराभिद्रक्षःपीठीपरिष्करणोचितः
कुलगिरितुलारोहे भावी कियानिव कौस्तुभः॥ ४३

स्थविरानिगमस्तोमस्थेयां यतीश्वरभारतीं
कुमतिफणितिक्षोमक्षौद्राः क्षिपन्तु भजन्तु वा।
रसपरिमलश्लाघाघोषस्फुटत्पुटभेदनं
लवणवणिजः [1]कर्पूरार्घं किमित्यभिमन्वते॥ ४४

वहति महिलामाद्यो वेधास्त्रयीमुखरैर्मुखैः
वरतनुतया वामो भागः शिवस्य विवर्तते।
तदपि परमं तत्त्वं गोपीजनस्य वशंवदं
मदनकदनैर्न क्लिश्यन्ते यतीश्वरसंश्रयाः॥ ४५

निगमपथिकच्छायाशाखी निराशमहानिधिः
महितविविधच्छात्रश्रेणीमनोरथसारथिः।
त्रिभुवनतमःप्रत्यूषोऽयं त्रिविद्यशिखामणिः
प्रथयति यतिष्मामृत्पारावरीमविपर्ययाम्॥ ४७

जडमतिमुधादन्तादान्तिव्यथौषधसिद्धयः
प्रमितिनिधयः प्रज्ञाशालिप्रपालनयष्टयः।

---

[1] कर्पूरोद्धम्

श्रुतिसुरभयः शुद्धानन्दाभिवर्षुकवारिदाः
यमगतिकथाविच्छेदिन्यो यतीश्वरसूक्तयः ॥ ४७

प्रातिकलमिह प्रत्यक्तच्वावलोकनदीपिकाः
यतिपरिबृढग्रन्थाश्चिन्तां निरन्तरयन्ति नः ।
[1]अकलुषपरज्ञानौत्सुक्यक्षुधातुरदुर्दशा-
परिणतफलप्रत्यासीदत्फलेग्रहिसुग्रहाः ॥ ४८

मुकुन्दाङ्घ्रिश्रद्धाकुमुदवनचन्द्रातपनिभाः
मुमुक्षामक्षोभ्यां ददति मुनिबृन्दारकगिरः ।
स्वसिद्धान्तध्वान्तास्थिरकुतुकदुर्वादिपारिषद्-
दिवाभीतप्रेक्षादिनकरसमुत्थानपरुषाः ॥ ४९

निरावाधा बोधायन[1]भणितिनिष्यन्दसुभगाः
विशुद्धोपन्यासव्यतिभिदुरशारीरकनयाः ।
अकुण्ठैः कल्पन्ते यतिपतिनिबन्धा निजमुखैः
अनिद्राणप्रज्ञारसधमनिवेधाय सुधियाम् ॥ ५०

विकल्पाटोपेन श्रुतिपथमशेषं विघटयन्
यदृच्छानिर्दिष्टे यतिनृपतिशब्दे विरमति ।

---

1 फाणिति

वितण्डाहंकुर्वत्प्रातिकथकवेतण्डपृतना-
वियातव्यापारव्यतिमथनसंरम्भकलहः ॥ ५१

प्रतिष्ठा तर्काणां प्रतिपदमृचां धाम यजुषां
परिष्कारः साम्नां परिपणमथर्वाङ्गिरसयोः ।
प्रदीपस्तत्त्वानां प्रतिकृतिरसौ तापसगिरां
प्रसात्तिं संवित्तेः [1]प्रदिशति यतीशानफणितिः ॥५२

हतावद्ये हृद्ये हरिचरणपङ्केरुहयुगे
निबध्नन्त्यैकान्त्यं किमपि यतिभूभृत्फणितयः ।
शुनासीरस्कन्दद्रुहिणहरहेरम्बहुतभुक्-
प्रभेशादिक्षुद्रप्रणतिपरिहारप्रातिभुवः ॥ ५३

यथाभूतस्वार्था यतिनृपतिसूक्तिर्विजयते
सुधासंदोहाब्धिः सुचरितविपक्तिः श्रुतिमताम् ।
कथादृप्यत्कौतस्कुतकलहकोलाहलहत-
त्रिवेदीनिर्वेदप्रशमनविनोदप्रणयिनी ॥ ५४

श्रुतिश्रेणीचूडापदबहुमते लक्ष्मणमते
स्वपक्षस्थान् दोषान् वितथमतिरारोपयति यः ।

---

1 प्रदिशतु

स्वहस्तेनोत्क्षिप्तैः स खलु निजगात्रेषु बहुलं
गलद्भिर्जम्बालैर्गगनतलमालिम्पति जडः ॥ ५५

निरालोके लोके निरुपधिपरस्नेहभरितो
यतिक्ष्माभृद्दीपो यदि न किल जाज्वल्यत इह ।
अहंकारध्वान्तं विजहति कथंकारमनघाः
कुतर्कव्यालौघं कुमतिमतपातालकुहरम् ॥ ५६

यतिक्ष्माभृद्दृष्टं मतमिह नवीनं तदपि किं
ततः प्रागेवान्यद्वद तदपि किं वर्णनिकषे ।
निशाम्यन्तां यद्वा [1]निजमतितिरस्कारविगमात्
निरातङ्काष्टङ्कद्रमिडगुहदेवप्रभृतयः ॥ ५७

सुधासारं श्रीमद्यतिवरभुवः श्रोत्रकुहरे
निषिञ्चन्ति न्यञ्चन्निगमगरिमाणः फणितयः ।
यदास्वादाभ्यासप्रचयमहिमोल्लासिताधियां
सदास्वाद्यं काले तदमृतमनन्तं सुमनसाम् ॥ ५८

यतिक्षोणीभर्तुर्यादिदमनिदंभोगजनता-
शिरःश्रेणीजुष्टं [2]तादिह [3]दृढबन्धं प्रभवति ।

---

[1] निजमत [2] मनसि [3] दृढबद्धं प्रभवतु

अविद्यारण्यानीकुहरविहरन्मामकमनः-
प्रमाद्यन्मातङ्गप्रथमनिगलं पादयुगलम् ।। ५९

सवित्री मुक्तानां सकलजगदेनःप्रशमनी
गरीयोभिस्तीर्थैरुपचितरसा यामुनमुखैः ।
[1]निरुच्छेदा निस्नेतरमपि समाप्लावयति मां
यदृच्छाविक्षेपात् यतिपतिदयादिव्यतटिनी ।। ६०

चिन्ताशेषदुरर्थदन्तुरवचःकन्थाशतग्रन्थिलाः
सिद्धान्ता न समिन्धते यतिवरग्रन्थानुसंधायिनी ।
मुक्ताशुक्तिविशुद्धसिद्धतटिनीचूडालचूडापदः
किं कुल्यां कलयेत खण्डपरशुर्मण्डूकमञ्जूषिकाम् ।।

वन्दे तं यमिनां धुरन्धरमहं मानान्धकारद्रुहा
पन्थानं परिपन्थिनां निजदृशा रुन्धानमिन्धानया ।
दत्तं येन दयासुधाम्बुनिधिना पीत्वा विशुद्धं पयः
काले नः करिशैलकृष्णजलदः काङ्क्षाधिकं वर्षति ।।

काषायेण गृहीतपीतवसना दण्डैस्त्रिभिर्मण्डिता
सा मूर्तिर्मुरमर्दनस्य जयति त्रय्यन्तसंरक्षिणी ।

---

[1] दुरुच्छेदा

यत्प्रख्यापिततीर्थवर्धितधिषामभ्यस्यतां यद्गुणान्
आसिन्धोरनिदंप्रदेशनियता कीर्तिः प्रजागर्ति नः ॥

लिप्से लक्ष्मणयोगिनः पदयुगं रथ्यापरागच्छटा-
रक्षारोपणधन्यसूरिपरिषत्सीमन्तसीमान्तिकम् ।
भिक्षापर्यटनक्षणेषु बिभरांचक्रे गलत्किल्बिषा
यद्विन्यासमिषेण [1]पत्रमकरीमुद्रां समुद्राम्बरा॥ ६४

नानातन्त्रविलोभितेन मनसा निर्णीतदुर्नीतिभिः
कष्टं कुत्सितदृष्टिभिर्यतिपतेरादेशवैदेशिकैः ।
व्यासो हासपदीकृतः परिहृतः प्राचेतसश्चेतसः
क्लृप्तःकेलिशुकःशुकः स च [2]मुधाबाधाय बोधायनः॥

अर्घ्या तिष्ठति मामिका मतिरसावाजन्मराजन्वती
पत्या संयमिनामनेनजगता मत्याहितच्छोदिना ।
यत्सारस्वतदुग्धसागरसुधासिद्धौषधास्वादिनां
प्रस्वापाय न बोभवीति भगवन्मायामहायामिनी॥

शुद्धादेशवशंवदीकृतयातिक्षोणीशवाणीशता-
प्रत्यादिष्टबहिर्गतिः श्रुतिशिरःप्रासादमासीदति ।

---

1 पद्ममकरीमुद्रां 2 मुधाबोधाय

दुग्धोदन्वदपत्यसन्निधिसदासामोददामोदर-
श्लक्ष्णालोकनदौर्ललित्यललितोन्मेषा मनीषा मम ॥ ६७

आस्तां नाम यतीन्द्रपद्धतिजुषामाजानशुद्धा मतिः
तच्चाव्याजविदग्धमुग्धमधुरं सारस्वतं शाश्वतम् ।
को वा चक्षुरुदञ्चयेदपि पुरः साटोपतर्कच्छटा
शस्त्राशस्त्रिविहारसंभृतरणास्वादेषु वादेषु नः ॥ ६८

पर्यासं पर्यचैषं कणचरणकथामाक्षपादं शिशिक्षे
मीमांसामांसलात्मा समजनिषि मुहुः सांख्ययोगौ समाख्यम् ।
इत्थं तैस्तैर्यतीन्द्रत्रुटितबहुमृषातन्त्रक्रान्तारपान्थैः
अन्तर्मोहक्षपान्धैरहह किमिह नाश्चिन्तनीयं तनीयः ॥ ६९

[1]गाथा तथागतानां गलति गमनिका कापिली क्वाऽपि लीना
क्षीणा काणादवाणी दुहिणहरगिरः सौरभं नारभन्ते ।
क्षामा कौमारिलोक्तिर्जगति गुरुमतं गौरवात् दूरवान्तं
का शङ्का शङ्करादेर्भजति यतिपतौ भद्रवेदीं त्रिवेदीम् ॥ ७०

विष्वग्व्यापिन्यगाधे यतिनृपतियशःसंपदेकार्णवेऽस्मिन्
श्रद्धाशुद्धावगाहैः शुभमतिभिरसौ वेङ्कटेशोऽभिषिक्तः ।

---

1 गाधा

प्रज्ञादौर्जन्यगर्जत्प्रतिकथकवचस्तूलवातूलवृत्त्या
सप्तत्या सारवत्या समतनुत सतां प्रीतिमेतां समेताम् ॥

आशामतङ्गजगणानविषह्यवेगान्
पादे यतिक्षितिभृतः प्रसभं निरुन्धन् ।
कार्यः कथाहवकुतूहलिभिः परेषां
कर्णे स एष कवितार्किकसिंहनादः ॥ ७१

उपशमितकुदृष्टिविप्लवानाम्
उपनिषदामुपचारदीपिकेयम् ।
कवलितभगवद्विभूतियुग्मां
दिशतु मतिं यतिराजसप्ततिर्नः ॥ ७२

करतलामलकीकृत[1]सत्पथाः
श्रुतिवतंसितसद्गुरुसूक्तयः ।

---

[1] सत्कथाः

दिवसतारकयन्ति समत्सरान्
यतिपुरन्दरसप्ततिसादराः ॥ ७४

॥ इति श्रीनिगमान्तगुरुभिरनुगृहीता
यतिराजसप्ततिः ॥



कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥



॥ श्रीमते निगमान्तमहादेशिकाय नमः ॥

॥ श्रीः ॥

॥ श्रीमते रामानुजाय नमः ॥

॥ श्रीब्रह्मतन्त्रस्वतन्त्रगुरवे नमः ॥

श्रीब्रह्मतन्त्रस्वतन्त्रगुरुभिरनुगृहीतः

॥ अवतारश्लोकः ॥




पर्यायभाष्यकाराय प्रणतार्तिं विधून्वते ।
ब्रह्मतन्त्रस्वतन्त्राय द्वितीयब्रह्मणे नमः ॥



चैत्रार्द्रसंभवं विष्णुदर्शनस्थापनोत्सुकम् ।
तुण्डीरमण्डले शेषमूर्तिं रामानुजं भजे ॥ १

(दिव्यसूरिस्तोत्रे)

॥ इति श्रीब्रह्मतन्त्रस्वतन्त्रगुरुभिरनुगृहीतः
अवतारश्लोकः ॥



पर्यायभाष्यकाराय प्रणतार्तिं विधून्वते ।
ब्रह्मतन्त्रस्वतन्त्राय द्वितीयब्रह्मणे नमः ॥

॥ श्रीब्रह्मतन्त्रस्वतन्त्रगुरवे नमः ॥

॥ श्रीः ॥

॥ श्रीमते रामानुजाय नमः ॥

॥ श्रीघटिकाशतवात्स्यवरदगुरवे नमः ॥

श्रीघटिकाशतवात्स्यवरदगुरुभिरनुगृहीताः

॥ [1]यतिराजविजयश्लोकाः ॥



नमो वरदविष्णवार्यनयनानन्ददायिने ।
वात्स्याय वरदार्याय वादिनीहारभास्वते ॥



मायाविमोहितसुरानसुरानलावीत्
येनाच्युतस्स कुहनासमयैर्मनुष्यान्
संमोहयत्सु पुनरेषु सुदर्शनोऽपि
तानेव जेतुमधुना यतिशेखरोऽभूत् ॥ १

---

[1] श्रीघटिकाशतवात्स्यवरदगुरुभिः [एते श्रीश्रुतप्रकाशिकाप्रसूतेः श्रीनडादूरम्माल् वात्स्यवरदगुरोः वंश्याः, श्रीनिगमान्तमहादेशिकस्य प्रशिष्याः, श्रीपरकालमठस्थापकस्य ब्रह्मतन्त्रस्वतन्त्रगुरोः शिष्याः, श्रीमदहोबिलमठस्थापकस्य शठकोपमुनेः आचार्याः ।] अनुगृहीतात् यतिराजविजयनाटकात् उद्धृता इमे श्लोकाः ॥

त्रिदण्डकाषायशिखोपवीतैः
प्रसाधयन् पारमहंस्यलक्ष्मीम् ।
वैकुण्ठमारोपयितुं मुमुक्षून्
सोपानकारी यतिराज एषः ॥ २

स एष साक्षात्कृतकृष्णदत्तां
निक्षेपविद्यां निरवद्यभूमा ।
गद्यात्मना कृष्णजनोपभोग्यां
संवादरूपां विदधे दयालुः ॥ ३

प्रमाणेष्वेष वेदान्तः प्रमेयेषु परः पुमान् ।
प्रमातृषु यतीन्द्रोऽयं न द्वितीयमपेक्षते ॥ ४

कर्मव्याजकृताखिलात्मनिवहक्लेशावबोधस्फुरत्-
पश्चात्तापकृपाविमोचितजगज्जन्मादिलीलादरम् ।
भोगैकप्रवणं विधास्यति परं ब्रह्मापि दत्ताभयः
भूतेभ्यो यतिराज एष इति मे चेतस्यभून्निश्चयः ॥ ५

देहाक्षादिविलक्षणोऽणुरजडो नित्योऽहमर्थोऽमल-
ज्ञानानन्दमयोऽप्यतन्मय इव भ्राम्यत्यविद्यावृतः ।
पश्चक्लेशविपाकपावकशिखालीढस्य तस्यात्मनः
निर्वाणाय निसर्गसौहृदनिधे ! नान्या गतिस्त्वां विना ६

सर्वज्ञो न न वेद तस्य करुणाराशेरुपेक्षा कुतः
सर्वेशः किमसौ न शक्ष्यति परित्रातुं तथापि प्रभुः ।
सर्वान् रक्षति यत्कटाक्षकणिकापेक्षी नरानुद्धरन्
संसारांबुनिधेः स एव हि गुरुः सर्वोत्तरं दैवतम् ॥ ७

त्रिवर्गमवधीरयन् त्रिविधचेतनाचेतन-
प्रपञ्चमयकञ्चुके भगवति स्वयं ज्योतिषि ।
निवेशितधियां सतां निखिलमङ्गलैकास्पदं
तमेव कथयन् गतिं यतिभिरीडितः क्रीडति ॥ ८

कुदर्शनानीतरदर्शनानि
यतीन्द्र ! कुर्वन्निजदर्शनेन ।
संयक् श्रुतिन्यायकलापदर्शी
सुदर्शनोऽसि प्रियदर्शनस्त्वम् ॥ ९

काले वर्षतु वासवः क्षितिभुजो रक्षन्तु संयक् महीं
सर्वे सन्तु निरामयाश्च कृतिनः सत्वोत्तराः प्राणिनः ।

पुण्या लोकमिदं पुनातु भगवद्भक्तिः चिरस्थायिनी
मालावत् यतिशेखरस्य विहरत्वाज्ञा वृणां मूर्धसु ॥ १०



॥ इति श्रीघटिकाशतवात्स्यवरदगुरुभिरनुगृहीताः
यतिराजविजयश्लोकाः ॥



नमो वरदविष्ण्वार्यनयनानन्ददायिने ।
वात्स्याय वरदार्याय वादिनीहारभास्वते ॥



॥ श्रीघटिकाशतवात्स्यवरदगुरवे नमः ॥

॥ श्रीः ॥

॥ श्रीमते रामानुजाय नमः ॥

॥ श्रीवरवरमुनये नमः ॥

श्रीवरवरमुनिभिरनुगृहीता

॥ यतिराजविंशतिः ॥



यः स्तुतिं यतिपतिप्रसादिनीं
व्याजहार यतिराजविंशतिम् ।
तं प्रपन्नजनचातकांबुदं
नौमि सौम्यवरयोगिपुङ्गवम् ॥

-:o:-

श्रीमाधवांघ्रिजलजद्वयनित्यसेवा-
प्रेमाविलाशयपराङ्कुशपादभक्तम् ।
कामादिदोषहरमात्मपदाश्रितानां
रामानुजं यतिपतिं प्रणमामि मूर्ध्ना ॥ १

श्रीरङ्गराजचरणांबुजराजहंसं
श्रीमत्पराङ्कुशपदाम्बुजभृङ्गराजम् ।

श्रीभट्टनाथपरकालमुखाब्जमित्रं
श्रीवत्सचिह्नशरणं यतिराजमीडे ॥ २

वाचा यतीन्द्र ! मनसा वपुषा च युष्मत्-
पादारविन्दयुगलं भजतां गुरूणाम् ।
कूराधिनाथकुरुकेशमुखाद्यपुंसां
पादानुचिन्तनपरस्सततं भवेयम् ॥ ३

नित्यं यतीन्द्र ! तव दिव्यवपुस्स्मृतौ मे
सक्तं मनो भवतु वाग्गुणकीर्तनेऽसौ ।
कृत्यं च दास्यकरणं तु करद्वयस्य
वृत्यन्तरेऽस्तु विमुखं करणत्रयं च ॥ ४

अष्टाक्षराख्यमनुराजपदत्रयार्थ-
निष्ठां ममात्र वितराद्य यतीन्द्र ! नाथ ! ।
शिष्टाग्रगण्यजनसेव्यभवत्पदाब्जे
हृष्टास्तु नित्यमनुभूय ममास्य बुद्धिः ॥ ५

अल्पाऽपि मे न भवदीयपदाब्जभक्तिः
शब्दादिभोगरुचिरन्वहमेधते हा ! ।
मत्पापमेव हि निदानममुष्य नान्यत्
तद्वारयार्य यतिराज ! दयैकसिन्धो ! ॥ ६

वृत्त्या पशुर्नरवपुस्त्वहमीदृशोऽपि
श्रुत्यादिसिद्धनिखिलात्मगुणाश्रयोऽयम् ।
इत्यादरेण कृतिनोऽपि मिथः प्रवक्तुः
अद्याऽपि वञ्चनपरोऽत्र यतीन्द्र ! वर्ते ॥ ७

दुःखावहोऽहमनिशं तव दुष्टचेष्टः
शब्दादिभोगनिरतः शरणागताख्यः ।
त्वत्पादभक्त इव शिष्टजनौघमध्ये
मिथ्या चरामि यतिराज ! ततोऽस्मि मूर्खः ॥ ८

नित्यं त्वहं परिभवामि गुरुं च मन्त्रं
तद्देवतामपि न किंचिदहो बिभेमि ।
इत्थं शठोऽप्यशठवत् भवदीयसंघे
धृष्टश्चरामि यतिराज ! ततोऽस्मि मूर्खः ॥ ९

हा ! हन्त ! हन्त ! मनसा क्रियया च वाचा
योऽहं चरामि सततं त्रिविधापचारान् ।
सोऽहं तवाप्रियकरः प्रियकृद्यथेव
कालं नयामि यतिराज ! ततोस्मि मूर्खः ॥ १०

पापे कृते यदि भवन्ति भयानुताप-
लज्जाः पुनः करणमस्य कथं घटेत ।

मोहेन मे न भवतीह भयादिलेशः
तस्मात् पुनःपुनरघं यतिराज ! कुर्वे ॥ ११

अन्तर्बहिस्सकलवस्तुषु सन्तमीशं
अन्धः पुरस्स्थितमिवाहमवीक्षमाणः ।
कन्दर्पवश्यहृदयः सततं भवामि
हन्त ! त्वदग्रगमनस्य यतीन्द्र ! नार्हः ॥ १२

तापत्रयीजनितदुःखनिपातिनोऽपि
देहस्थितौ मम रुचिस्तु न तन्निवृत्तौ ।
एतस्य कारणमहो मम पापमेव
नाथ ! त्वमेव हर तद्यतिराज ! शीघ्रम् ॥ १३

वाचामगोचरमहागुणदेशिकाग्र्य-
कूराधिनाथकथिताखिलनैच्यपात्रम् ।
एषोऽहमेव न पुनः जगतीदृशस्तत्
रामानुजार्य ! करुणैव तु मद्गतिस्ते ॥ १४

शुद्धात्मयामुनगुरूत्तमकूरनाथ-
भट्टाख्यदेशिकवरोक्तसमस्तनैच्यम् ।
अद्यास्त्यसंकुचितमेव मयीह लोके
तस्माद्यतीन्द्र करुणैव तु मद्गतिस्ते ॥ १५

शब्दादिभोगविषया रुचिरस्मदीया
नष्टा भवत्विह भवद्दयया यतीन्द्र !।
त्वद्दासदासगणनाचरमावधौ यः
तद्दासतैकरसताऽविरता ममास्तु ॥ १६

श्रुत्यग्रवेद्यनिजदिव्यगुणस्वरूपः
प्रत्यक्षतामुपगतस्त्विह रङ्गराजः ।
वश्यस्सदा भवति ते यतिराज ! तस्मात्
शक्तस्स्वकीयजनपापविमोचने त्वम् ॥ १७

कालत्रयेऽपि करणत्रयनिर्मितादि-
पापक्रियस्य शरणं भगवत्क्षमैव ।
सा च त्वयैव कमलारमणेऽर्थिता यत्
क्षेमस्स एव हि यतीन्द्र भवच्छ्रितानाम् ॥ १८

श्रीमन् ! यतीन्द्र ! तव दिव्यपदाब्जसेवां
श्रीशैलनाथकरुणापरिणामदत्ताम् ।
तामन्वहं मम विवर्धय नाथ तस्याः
कामं विरुद्धमखिलं च निवर्तय त्वम् ॥ १९

विज्ञापनं यदिदमद्य तु मामकीनं
अङ्गीकुरुष्व यतिराज ! दयाम्बुराशे ।

अज्ञोऽयमात्मगुणलेशविवर्जितश्च
तस्मादनन्यशरणो भवतीति मत्वा ॥ १०



॥ इति श्रीवरवरमुनिभिरनुगृहीता
यतिराजविंशतिः ॥

इति यतिकुलधुर्यमेघमानैः
श्रुतिमधुरैरुदितैः प्रहर्षयन्तम् ।
वरवरमुनिमेव चिन्तयन्ती
मतिरियमेति निरत्ययं प्रसादम् ॥



॥ श्रीमते वरवरमुनये नमः ॥

॥ श्रीः ॥

॥ श्रीमते रामानुजाय नमः ॥

॥ श्रीवादिभीकरगुरवे नमः ॥

श्रीवादिभीकरगुरुभिरनुगृहीतं

॥ श्रीरामानुजसुप्रभातम् ॥

जय जय यतिसार्वभौमामलस्वान्त ! तुभ्यं नमः
जय जय जनिसिन्धुमग्नात्मसन्तारकग्रामणीः ! ।
जय जय भजनीय ! कूरेशमुख्यैः प्रसीद प्रभो !
जय जय विदुषां निधे ! जागृहि श्रीनिधे ! जागृहि ॥ १

पूर्णार्यपूर्णकरुणापरिलब्धबोध !
वैराग्यभक्तिमुखदिव्यगुणामृताब्धे ! ।
श्रीयामुनार्यपदपङ्कजराजहंस !
रामानुजार्य ! भगवन् ! तव सुप्रभातम् ॥ २

आनेतुमद्य वरदस्य गजाद्रिभर्तुः
पानीयमच्छमतिशीतमगाधकूपात् ।

ध्वान्तं निरस्तमरुणस्य करैस्समन्तात्
रामानुजार्य ! भगवन् ! तव सुप्रभातम् ॥ ३

श्रीरङ्गराजपदपङ्कजयोरशेष-
कैङ्कर्यमाकलयितुं सकुतूहलस्त्वम् ।
उत्तिष्ठ नित्यकृतिमप्यखिलं च कर्तुं
रामानुजार्य ! भगवन् ! तव सुप्रभातम् ॥ ४

त्वां वीक्षितुं समुपयाति वृषाचलेन्द्रः
त्वत्संप्रकल्पवरशङ्खरथाङ्गपाणिः ।
संयोजिताम्बुरसि मां भवतैव बिभ्रत्
रामानुजार्य ! भगवन् ! तव सुप्रभातम् ॥ ५

श्रीमत्कुरङ्गपरिपूर्णविभुस्त्वदुक्तं
श्रीभाष्यशास्त्रममलं त्वयि भक्तियुक्तः ।
श्रोतुं समिच्छति यतीन्द्र ! सितोर्ध्वपुण्ड्रः
तं बोधयार्थमखिलं तव सुप्रभातम् ॥ ६

श्रीभाष्यमालिखितुमात्तविशाललेख्यः
श्रीवत्सचिह्नगुरुरानतदिव्यगात्रः ।
वेदान्तसूत्रमपि वक्तुममुष्य सर्वं
उत्तिष्ठ लक्ष्मणमुने ! तव सुप्रभातम् ॥ ७

श्रीमान् स पूर्णवटुरादरतः प्रगृह्य
श्रीपादुकां यतिपते ! पदयोः प्रयोक्तुम् ।
द्वारि स्थितिं वितनुते प्रणतार्तिहारिन् !
रामानुजार्य ! भगवन् ! तव सुप्रभातम् ॥

काषायवस्त्रकटिसूत्रकमण्डलूंश्च
श्रीदन्तकाष्ठमपि देशिकसार्वभौमाः ।
पाणौ निधाय निवसन्ति विशुद्धगात्राः
रामानुजार्य ! भगवन् ! तव सुप्रभातम् ॥ ९

त्वां बोधयन्ति गुरवः प्रथिता महान्तः
श्रीवैष्णवाश्च यमिनस्तव पादभक्ताः ।
एकान्तिनश्च विमलास्त्वदनन्यभावाः
तान् पालयाद्य यतिशेखर ! सुप्रभातम् ॥ १०

ब्राह्मे प्रबुध्य विबुधाः स्वगुरून् प्रणम्य
रामानुजाय नम इत्यसकृत् ब्रुवाणाः ।
अष्टाक्षरं सचरमं द्वयमुच्चरन्ति
रामानुजार्य ! भगवन् ! तव सुप्रभातम् ॥ ११

प्रातः पठन्ति परमद्रविडप्रपन्न
गायत्रिमन्त्रशतमष्टशिरस्कमच्छम् ।

श्रीवैष्णवास्तव पदाब्जनिविष्टभावाः
रामानुजार्य ! भगवन् ! तव सुप्रभातम् ॥ १२

आराधनं रचयितुं कमलासखस्य
श्रीयादवाचलपतेः विविधोपचारैः ।
पातुं च दृष्टिकमलेन नतानशेषान्
रामानुजार्य ! भगवन् ! तव सुप्रभातम् ॥ १३

ससेव्य ! सप्तशतसंयमिसार्वभौमैः
सद्देशिकैः सकलशास्त्रविदां वरिष्ठैः ।
एकान्तिभिः परमभागवतैर्निषेव्य !
रामानुजार्य ! भगवन् ! तव सुप्रभातम् ॥ १४

गद्यत्रयं निगमशेखरदीपसारौ
वेदार्थसंग्रहमपि प्रथितं च नित्यम् ।
गीतार्थभाष्यमपि देशिकपुङ्गवानां
दातुं प्रसीद यतिशेखर ! सुप्रभातम् ॥ १५

पादांबुजं यतिपते ! शरणं विहर्तुं
संगत्य संसरणवारिविलंघनोत्काः ।
आयान्ति हस्तकमलाभिधृतोपचाराः
तान् पाहि करुणया तव सुप्रभातम् ॥ १६

स्नातुं कवेरतनयासलिलेषु शिष्यैः
आचार्यपूरुषवरैः यतिभिर्विशुद्धैः ।
श्रीवैष्णवैश्च सह सेव्य ! महानुभावैः
रामानुजार्य ! भगवन् ! तव सुप्रभातम् ॥ १७

रामानुजार्य ! रमणीयगुणाभिराम !
रागादिदूरगगुरो ! गुरुसार्वभौम ! ।
सत्त्वप्रधान ! शरणागतवत्सल ! त्वत्पादा-
ब्जयोरिह परत्र च किंकरः स्याम् ॥ १८

॥ इति श्रीवादिभीकरगुरुभिरनुगृहीतं
श्रीरामानुजसुप्रभातम् ॥

॥ श्रीवादिभीकरगुरवे नमः ॥

॥ श्रीः ॥

॥ श्रीमते रामानुजाय नमः ॥

॥ श्रीवादिभीकरगुरवे नमः ॥

श्रीवादिभीकरगुरुभिरनुगृहीतं

॥ श्रीभाष्यकारमंगलम् ॥



श्रीपराङ्कुशपादाब्जसुरभीकृतमौलये ।
श्रीवत्सचिह्ननाथाय यतिराजाय मंगलम् ॥ १

नाथपद्माक्षरामार्यपादपङ्कजसेविने ।
सेव्याय सर्वयमिनां यतिराजाय मंगलम् ॥ २

पूर्णाय पूर्णकरुणापात्रायामिततेजसे ।
मालाधरप्रियायास्तु यतिराजाय मंगलम् ॥ ३

संसेव्य यामुनाचार्यं एकलव्योस्म्यहं गुरोः ।
इत्येवं वदते नित्यं यतिराजाय मंगलम् ॥ ४

श्रीकाञ्चीपूर्णमिश्रोक्तरहस्यार्थविदे सदा ।
देवराजप्रियायास्तु यतिराजाय मंगलम् ॥ ५

श्रीमद्गोष्ठीपुरीपूर्णदिव्याज्ञां कुर्वते मुदा ।
श्लोकार्यं गृह्णते तस्मात् यतिराजाय मंगलम् ॥ ६

कूरेशकुरुकानाथदाशरथ्यादिदेशिकाः ।
यच्छिष्या भान्ति ते तस्मै यतिराजाय मंगलम् ॥ ७

चरमश्लोकतत्त्वार्थं ज्ञात्वार्याज्ञां विलंघ्य च ।
दिशते तं स्वकीयेभ्यः यतिराजाय मंगलम् ॥ ८

श्रीशैलपूर्णकृपया श्रीरामायणमर्थतः ।
भक्त्या येन श्रुतं तस्मै यतिराजाय मंगलम् ॥ ९

शङ्करादिकुदृष्टीनां बाह्यानां निधनाय च ।
श्रीभाष्यं कुर्वते तस्मै यतिराजाय मंगलम् ॥ १०

कुर्वन्नुपनिषद्भाष्यं जगद्रक्षां करोति यः ।
दायायाः परतन्त्राय भाष्यकाराय मंगलम् ॥ ११

द्रमिडोपनिषद्व्याख्यां कालयेति कृपाबलात् ।
शासते कुरुकेशं तं भाष्यकाराय मंगलम् ॥ १२

गत्वा तु शारदापीठं वृत्तिं बोधायनस्य च ।
अवलोक्यागतायास्तु भाष्यकाराय मंगलम् ।। १३

परमाणुमृषावादिवादसंहारकारिणे ।
तस्मै भगवते श्रीमद्भाष्यकाराय मंगलम् ।। १४

श्रीमत्कुरङ्गपूर्णाय श्रीभाष्यं वदते स्वयम् ।
पित्रे संपत्सुतस्यापि भाष्यकाराय मंगलम् ।। १५

दत्त्वा वृषगिरीशस्य शंखचक्रे रमापतेः ।
परमप्रीतियुक्ताय भाष्यकाराय मंगलम् ।। १६

सन्न्यासं कुर्वते काञ्च्यां अनन्तसरसीतटे ।
वरदे न्यस्तभाराय भाष्यकाराय मंगलम् ।। १७

श्रीमन्महाभूतपुरे श्रीमत्केशवयज्वनः ।
कान्तिमत्यां प्रसूताय यतिराजाय मंगलम् ।। १८

शेषो वा सैन्यनाथो वा श्रीपतिर्वेति सात्विकैः ।
वितर्क्याय महाप्राज्ञैः यतिराजाय मंगलम् ।। १९

प्रकृष्टगुणपूर्णाय प्राप्याय स्वांघ्रिसेविनाम् ।
प्रपन्नसार्थवाहाय यतिराजाय मंगलम् ।। २०

वेदात्मकप्रमाणेन सात्त्विकैश्च प्रमातृभिः ।
प्रमेयेण सह श्रीमान् वर्धतां यतिशेखरः ॥ २१



॥ इति श्रीव दिभीकरगुरुभिरनुगृहीतं
श्रीभाष्यकारमङ्गलम् ॥



॥ श्रीवादिभीकरगुरवे नमः ॥

॥ श्रीः ॥

॥ श्रीमते रामानुजाय नमः ॥

॥ श्रीमते वेङ्कटाध्वरिणे नमः ॥

श्रीवेङ्कटाध्वरिगुरुभिरनुगृहीताः

॥ श्रीरामानुजवर्णनाश्लोकाः ॥



एषा भूतपुरी निरीक्षितचरी दोषापहन्त्री मया
श्रीमानत्र गुणाब्धिराविरभवत् रामानुजार्यो मुनिः ।
त्रय्यन्तामृतसिन्धुमन्थनभवद्धृय्यंगवीनात्मकं
विज्ञानं यदुपज्ञमेव विदुषामद्यापि विद्योतते ॥ १

कामादिवैरिगणभीमानवद्यनिजनामाभिलाषगरिमा
वैमानिकार्यसमभूमा मतौ वचनसीमातिलंघिमहिमा ।
श्रीमाननूनकलसोमाननो विमलधामावमानितरविः
क्षेमाणि जृम्भयतु भूमावमुत्र स च रामानुजो यतिपतिः ॥

स जयति रामानुजयतिः
अजयति परवादिनं यदीयोक्तिः ।

संजयति बोधमनघं
रञ्जयति बुधान् व्यथां च भञ्जयति ॥ ३

ते मीमांसाशास्त्र-
प्रमथनपरिकलितबुधजनानन्दाः ।
लक्ष्मणमुनेः प्रबन्धाः
लक्ष्मणपूर्वजशरा इव जयन्ति ॥ ४

रामानुजाय गुरवे नरवेषभाजे
शेषाय धूतकलये कलये प्रणामान् ।
यो मादृशानपि कृशान् परिपातुकामः
भूमाववातरदुदञ्चितबोधभूमा ॥ ५

रामानुजौ यामुनतीर्थसेवा-
परावुदीतौ नरकं निरोद्धुम् ।
तयोः पुराणः प्रणिनाय गीतां
तस्या नवीयस्तु ततान टीकाम् ॥ ६

यामुनतीर्थाश्रमिणौ
रामानुजमुनिर्मुकुन्दश्च ।
आद्यं त्रिवेणुधरमधिकं
अन्यदन्ताद्यमेकवेणुधरम् ॥ ७

नित्यं हेयगुणावधूननपराः नैर्गुण्यवादाः श्रुतौ
मुख्यार्थाः सगुणोक्तयः शुभगुणप्रख्यापनात् ब्रह्मणः ।
अद्वैतश्रुतयो विशिष्टविषयाः निष्कृष्टरूपाश्रया
भेदोक्तिः तदिहाखिलश्रुतिहितं रामानुजीयं मतम् ॥ ८

जयतु जगति लक्ष्मणार्यपक्षः
जयतु वचः श्रुतिमौलिदेशिकानाम् ।
जयतु निगमवर्त्मनिस्सपत्नं
जयतु चिराय च मूर्तिरञ्जनाद्रौ ॥ ९

(विश्वगुणादर्शचम्पूतः)

॥ इति श्रीवेङ्कटाध्वरिगुरुभिरनुगृहीताः
श्रीरामानुजवर्णनाश्लोकाः ॥

॥ श्रीमते वेङ्कटाध्वरिणे नमः ॥

॥ श्रीः ॥

॥ श्रीमते रामानुजाय नमः ॥

॥ प्रार्थनापञ्चकम् ॥



यतीश्वर ! श्रृणु श्रीमन् ! कृपया परया तव ।
मम विज्ञापनमिदं विलोक्य वरदं गुरुम् ॥ १

अनादिपापरचितां अन्तःकरणनिष्ठिताम् ।
यतीन्द्र ! विषये सान्द्रां विनिवासय वासनाम् ॥ २

अपि प्रार्थयमानानां पुत्रक्षेत्रादिसंपदाम् ।
कुरु वैराग्यमेवात्र हितकारिन् यतीन्द्र ! नः ॥ ३

यथापराधा न स्युर्मे भक्तेषु भगवत्यपि ।
तथा लक्ष्मणयोगीन्द्र ! यावद्देहं प्रवर्तय ॥ ४

आमोक्षं लक्ष्मणार्य ! त्वत्प्रबन्धपरिशीलनैः ।
कालक्षेपोऽस्तु नः सद्भिः सहवासमुपेयुषाम् ॥ ५

इत्येतत् सादरं विद्वान् प्रार्थनापञ्चकं पठन् ।
प्राप्नुयात् परमां भक्तिं यतिराजपदाब्जयोः ॥ ६



॥ इति प्रार्थनापञ्चकम् ॥

॥ श्रीमते रामानुजाय नमः ॥

॥ श्रीः ॥

॥ श्रीमते रामानुजाय नमः ॥

अनेकाचार्यैरनुगृहीताः

॥ श्रीरामानुजस्तवश्लोकाः ॥



काषायशोभिकमनीयाशिखानिवेशं
दण्डत्रयोज्वलकरं विमलोपवीतम् ।
उद्यद्दिनेशनिभमुल्लसदूर्ध्वपुण्ड्रं
रूपं तवास्तु यतिराज ! दृशोर्ममाग्रे ॥ १

नमः प्रणवशोभितं नवकषायखण्डाम्बरं
त्रिदण्डपरिमण्डितं त्रिविधतत्त्वनिर्वाहकम् ।
दयाञ्चितदृगञ्चलं दलितवादिवाग्वैभवं
शमादिगुणसागरं शरणमेमि रामानुजम् ॥ २

एतानि तानि भुवनत्रयपावनानि
संसाररोगशकृत्करणौषधानि ।

जिह्वातले मम लिखानि यथा शिलायां
रामानुजेति चतुराण्यमृताक्षराणि ॥ ३

(केषांचित् पूर्वाचार्याणाम्)

सनातनसरस्वतीकुमुदसंपदुज्जृम्भकैः
अपाकृततमोभरैः अपहृताभितापांकुरैः ।
वचोनिचयचन्द्रिकाविलसितैस्स विष्णोः पदे
विशुद्धिमभिदर्शयन् वितनुतां यतीन्दुः श्रियम् ॥ ४

महीयांसं हर्षं मनसि वितरीतुं तनुभृतां
उदीतौ द्वौ ताराप्रियतमयतिक्ष्मापरिवृढौ ।
कालादानाद्यो भजति लघुतां पश्यत जनाः
परो दोषापेतः प्रथयति ततो हन्त गुरुताम् ॥ ५

(श्रीकौशिककविताकिंकरसिंहमिश्राः
आचार्यचम्पूग्रन्थे)

श्रीमान् रामानुजार्यो जगति विजयतामग्रयायी यतीनां
यन्नामोल्लापमात्रात् नरपतितनयां प्रात्यजत् ब्रह्मरक्षः ।
यस्याभाति त्रिदण्डी चिदचिदपि परं चेति तत्त्वत्रयस्य
स्थित्यादिस्थापनार्थं पृथगमिकलिता केतुदण्डत्रयीव ॥ ६

यत्कीर्तिः स्वमतप्रवेशसुहृदां अङ्गेषु पुण्ड्रायते
स्वान्ते सत्त्वगुणायतेऽथ भगवद्ध्यानाख्यगङ्गायते ।
सन्तोषादधिरोहतां हरिपदं तत्सूत्रयन्त्रायते
जीयादेष यतीश्वरो भुवि चिरं भूयाच्च नस्सपदे ॥ ७

वल्मीकप्रभवो मुनिः स्वयमिह प्रोक्तो बुधेन्द्रैः कविः
वल्मीकप्रभवेन्द्र एष यमिनां श्रेष्ठः श्रुतः पाण्डितः ।
व्यासस्सोऽपि पराशरेण जनितः श्रीकेशवार्यैः गुरुः
शेषश्च स्वयमित्यबोधि धरणौ को वा यतीन्दोस्समः ॥ ८

(श्रीषड्गीश श्रीनिवासाचार्याः-श्रीयतिपति-
वैभवदीपिकायाम्)

उदयगिरिसमृद्धो यः कराग्रेण पृथ्वीं
अपहततिमिरौघां अद्भुतार्थप्रकाशाम् ।
अकृत निगममूर्तिः गोनिधिर्भुक्तिनेता
जयति स यतिराजो भास्करो लोकबन्धुः ॥ ९

(श्रीमदभिनवदेशिकवीरराघवाचार्यस्वामिनः,
श्रुतप्रकाशिकाभूमिकायाम्)

-:o:-

॥ इति अनेकाचार्यैरनुगृहीताः
श्रीरामानुजस्तवश्लोकाः ॥

॥ श्रीमते रामानुजाय नमः ॥

॥ श्रीः ॥

॥ श्रीनिधये नमः ॥

॥ श्रीमते रामानुजाय नमः ॥

॥ [1]यतिपतिषण्णवातिः ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे ।
करुणादिगुणाढ्याय कमलानिधये नमः ॥

(1. अनुष्टुभ्)

वन्दे[2]नलाग्रजशरच्चापजं चापपत्तने ।
कुर्वन् [3]नलानुजशरन्मधुजातयतिस्तुतिम् ॥ १

---

1 'आगामिनि पिङ्गले वत्सरे भगवतः श्रीरामानुजस्य षोडशी षष्टिपूर्तिः (960 संवत्सराणां पूर्तिः) भविता। सा च उत्सवैः पूर्णा कर्तव्या। तदङ्गतया श्रीरामानुजविषयकाः प्रबन्धाः उपन्यासाश्च विद्वद्भिः कर्तव्याः।' इति प्रार्थये।'' — इति श्रीकाञ्ची- विद्वद्वरेण्य- पद्मभूषण- महामहिमोपाध्याय, प्रतिवादि-भयङ्करमण्णङ्गराचार्यस्वामिनः स्वकीय 'रामानुजन्' नाम द्रमिडपत्रिकायां संदेशमदिशन्। श्रीकवीश्वराः तेन संदेशेन प्रचोदिताः 960 संवत्सरपूर्तिजन्मर्क्षोत्सवत्वात् अस्य, 96 श्लोकैः पूर्णा इमां यतिपतिषण्णवातिं अरचयन्।

एवं शुभसन्देशावहरामानुजपत्रिकायै स्वकृतज्ञतां दर्शयन्तः 90--तमे श्लोके श्लेषेण श्रीरामानुजसाम्यं तस्या उपपादयन्ति कवीश्वराः ॥

पिङ्गलवत्सरे भगवतो रामानुजस्य अवतारः। स च भगवतः आदिशेषस्य अवतारविशेषः। छन्दश्शास्त्रकृत् पिङ्गलमुनिश्च तथा आदिशेषस्य अवताराविशेषः। अतः नानाविध (54) वृत्तैरभिपूर्णेयं षण्णवतिः कल्पिता कविसार्वभौमैः ॥

[2] नलाग्रजशरच्चापजः—राक्षसवत्सरे धनुर्मासे जातः इत्यर्थः। चापपत्तने-धनुष्पुरे। श्रीकविसार्वभौमानां गुरवः श्रीवात्स्यवेङ्कट-शेषार्यमहादेशिकाः राक्षसवर्षे चापमासि अवतारं कृतवन्तः। तत एवं वर्णना ॥

[3] नलानुजशरत्-पिंगलवत्सरः। मधुजातः-चैत्रमासे कृतावतारः 'मधुश्च माधवश्च वासन्तिकावृतू' इति भगवती श्रुतिः ॥

(2. पंक्तिविशेषः-
यतिनुतिः[1])

पिङ्गलनामकवत्सरजं मंगलदं यतिवृन्दपतिम् ।
पिङ्गलदर्शितवृत्तकुलैः अंगलसच्छुभपुण्ड्रमये ॥ २

(3. वियोगिनी)

अभिवन्द्य यतीन्द्रसंश्रयान्
अनघानाश्रितपापनाशकान् ।
अहमद्य करोमि सन्मुनेः
अतिहृद्यामलवृत्तमालिकाम् ॥ ३

(4. मालभारिणी)

भगवन्नुदितो [2]भवस्य तारे
मतमंहो ! स भवस्य तल्लुनासि ।
मधुमासभवस्तथा कथं वा
मधुविद्वेषिणि सक्तमानसोऽभूः ॥ ४

---

[1] नवमिदं वृत्तम्। यतिनुतिरिति नामधेयमस्य अस्माभिः दत्तम्॥

[2] भवस्य तारे :—आर्द्रानक्षत्रे—'आर्द्रा नक्षत्रं रुद्रो देवता' इति श्रुतिः॥

भगवन्नुदितो भवस्य तारे
भवताराय नतस्य चेष्टसे त्वम् ।
मधुमासभवस्तथैव संयक्
मधुमद्धाष्ययुगं प्रणीतवान् त्वम् ॥ ५

(5. श्रीः)

श्रीस्ते । सा स्तात् ॥ ६

(6. स्त्री)

श्रीमन् ! योगिन् !। विद्यां दद्याः ॥ ७

(7. मृगी)

दीव्यतान्मानसे । मे भवान् सन्ततम् ॥ ८

(8. कन्या)

योगिन्नस्मत्स्वामिन् !जीयाः । जीया योगिन्नस्मत्स्वामिन् !॥

(9. पंक्तिः)

श्रीयतिनेतुः ध्यानविधाता । पश्यति तत्त्वं वेदशिरस्थम् ॥

(10. प्रिया)

यतिराट्पदे निरतस्सदा ।
यमभीकरो भविता पुमान् ॥ ११

(11. तनुमध्या)

मूर्तिर्यतिनेतुः शोणायितवस्त्रा ।
वंशं कलयन्ती पायादघराशेः ॥ १२

(12. नरप्रिया[1])

भवति भाष्यकृत् भगवतः प्रियः ।
भवभयापहो भज तमुन्नतम् ॥ १३

(13. सोमराजी)

यदा लक्ष्मणार्यं मुदा पूजयेन्ना ।
तदा वेदशीर्ष्णां विदा शंसितस्स्यात् ॥ १४

(14. मदलेखा)

राजायं यतिपंक्तेः राजा सन् द्विजपंक्तेः ।
अज्ञानं भवरात्रेः नुद्यान्नस्तम एतत् ॥ १५

---

[1] नरप्रिया—नवमिदं वृत्तं कविप्रयुक्तम् ।
इदमस्माभिः दत्तं नामधेयमस्य ॥

रामायामयि रागं मा याया मम चित्त !।
गोदायास्सहजेऽस्मिन् मायाया हृति यायाः ॥ १६

[* अनुष्टुभ् *]

श्रीमद्रामानुजौ वन्दे गीतातद्भाष्यदायिनौ ।
वंशालंकृतहस्ताब्जौ गोदानाथसहोदरौ ॥ १७

अद्वैतं श्रवसां नेत्रैः द्वैतं च रसनासु यः ।
धत्ते स एव योगी सन् विशिष्टाद्वैतमब्रवीत् ॥ १८

(15. प्रमाणिका)

श्रुतिस्मृतिप्रमाणिका यतिप्रकाण्डभारती ।
सुधानिमग्नविग्रहं करोति पण्डितं जनम् ॥ १९

(16. गजगतिः)

बुधगणैराभिनुतो मुनिमणिः श्रितहरिः ।
श्रुतिशिरःकृतमतिः शुभतातिं वितनुताम् ॥ २०

(17, बृहतीविशेषः—
यादवी[1])

यादववञ्चितचेता यः यादवपूजितपादो यः ।
यादवपर्वतवासी यः यादववंशजचेता यः ॥ २१

---

[1] नवमिदं वृत्तम् । एतदस्माभिः दत्तं नामधेयम् ॥

(18. बृहत्युपजातिः)

ब्राह्मणराक्षसपीडायाः भूपतिपुत्रीं पालयता।
ख्यापितरामानुजनाम्ना संयमिराजा तेन वयम्॥ २२

(19. चंपकमाला)

हन्त सनाथा तेन न चिन्ता
संसृतिरक्षोभूतपिशाचात्।
लक्ष्मणयोगीड्श्रीपदसक्तान्
लक्ष्मणपूर्वः पातुमिहास्ति॥ २३

मत्तमयूरो बाणरणेऽभूत्
खण्डितवीर्यो येन षडास्यः।
तं हि भुजङ्गं कञ्चन चित्ते
हन्त विधत्ते श्रीयतिराजः॥ २४

(20. मत्ता)

मा मा चेतो धनमदमत्तान्
याया मर्त्यान् शृणु तव पथ्यम्।
योगीन्दो हे यतिशतमन्यो!
नाथेत्येवं वद सुखभाक् स्याः॥ २५

(21. पंक्तिविशेषः-
यतिमहिता[1])

अयि भज मानस ! यतिराजं
श्रितहितदायकपदरेणुम् ।
यदि भवभीकुलमपनेतुं
मतिरपि ते मुदमथ भोक्तुम् ॥ २६

(22. त्वरितगतिः)

मतमखिलं श्रुतिरहितं
यतिपतिना परिमथितम् ।
श्रुतिमधुरं परमरतं
जगति ततं जयतितराम् ॥ २७

(23. स्वागता)

धन्विनव्यपुरजातरसायाः
इष्टपूरकसहोदर ! धीर ! ।
संयमीन्द्र ! करुणारसलीला-
सौधमानस ! सदा वस चित्ते ॥ २८

शेमुषीति भवता किल पद्ये
संप्रयुक्तमयि ! शेष ! यतीन्द्र ! ।

---

[1] नवमिदं वृत्तम् । एतदस्यास्माभिः दत्तं नामधेयम् ॥

योऽमुमीरयति शब्दमभिज्ञः
तस्य भाति हृदये स हि शेषी ॥ २९

संयमीन्द्रपदपद्मभवान् ये
संवहन्ति शिरसा शुभरेणून् ।
संनमन्ति सहसा सुरलोकाः
संघशोऽतिविनयेन युतास्तान् ॥ ३०

(24. इन्द्रवज्रा)

श्रीवारिजातोदितकल्पतादृक्-
श्रीवाजिमेधोदितविग्रहाय ।
श्रीवारणाद्रीश्वरभूषणाय
श्रीवारिदो भाति यतीश्वरो नः ॥ ३१

(25. उपजातिः)

सरस्वतीयं सरसा भवन्तं
सन्न्यासिनं नाम सदाऽऽश्रयन्ती।
सन्न्यासिनी साधु बभूव तस्मात्
सन्तं न योगं सहते स्वभर्तुः ॥ ३२

श्रीलक्ष्मणाचार्यपदावलम्बी
कदाऽपि कृच्छ्रं न समेति धन्यः ।
श्रीलक्ष्मणे तत्पदसंश्रये च
श्रीरामभद्रस्सुमनास्स तादृक् ॥ ३३

(26. अनुकुला)

संयमिनेतुश्चरणसरोजं
सन्ततमन्तर्विलसतु मान्यम् ।
संकटसंघः प्रतिचकितो यत्
संप्रति भीतः परिगलितोऽस्मत् ॥ ३४

(27. दोधकम्)

संयमिनायकपादभवानां
सात्विकसन्ततिमौलिधृतानाम् ।
संसृतिसंभवतापहराणां
संतु कणा मयि रेणुगणानाम् ॥ ३५

(28. वंशस्थम्)

स नाम लोके मनुजो महीयते
स नाम दूरीकुरुतेऽघविभ्रमम् ।

स नाम सर्वानिह विन्दते शुभान्
सदा मुदा यो यतिराजसेवकः ॥ ३६

(29. भुजङ्गप्रयातम्)

अहो यादवाद्यैर्वनान्तर्विसृष्टः
किरातेन केनाऽपि जायायुतेन ।
निमेषेण नीतोऽसि काञ्चीसमीपं
रसं पातुकामेन नित्यं धरण्याम् ॥ ३७

सुचित्रावतारं भवन्तं सुधीन्द्राः
वदन्त्येव युक्तं ततस्संयमीन्द्र ! ।
सुचित्रावतारो भवान् सत्यमेतत्
किमत्रास्ति चित्रं परामर्शभाजाम् ॥ ३८

(30. स्राग्विणी)

लक्ष्मणं सन्मुनिं भावये सन्ततं
भक्तिमत्तल्लजं श्रीपतेः पादयोः ।
अम्बरं शोणितं दण्डकं पुण्ड्रकं
बिभ्रतं विग्रहे मानसे सद्यताम् ॥ ३९

(31. द्रुतविलम्बितम्)

यतिपते ! कापिलादिमतानि ते
भणितिभिः परमुन्नतयुक्तिभिः ।
परिहतानि विचिन्त्य विदः श्रुतेः
परमनन्दथुपूरितमानसाः ॥ ४०

भवभजं भज हे भवभञ्जकं
भवपितुः पितुरान्तररञ्जकम् ।
भवततिर्भवतीह परत्र सा
भव मनो ! मम तेन निराकुलम् ॥ ४१

(32. कुसुमविचित्रा)

यतिपतिवाणी सरलगभीरा
श्रुतिशतनन्द्या मुररिपुभोग्या ।
मनसि मदीये विलसतु नित्यं
परमतजातैरपि बहुमान्या ॥ ४२

(33. मणिमाला)

नित्यं कुरु कण्ठे योगीश्वरनाम्नां
वर्णावलिरूपां काञ्चिन्मणिमालाम् ।

भीतिर्न भवाख्यात् भीमादहिराजात्
चित्ते तव कुर्यात् नृत्तं ममामित्र ! ॥ ४३

(34. ललिता)

श्रीलक्ष्मणार्यमुनिनाथकीर्तनात्
श्रीलक्षितात्मपृथुवक्षसो हरेः ।
श्रीपूरितानि ललितानि ते पुरः
श्रीमन् ! भवन्ति मम मित्र ! निश्चितम् ॥ ४४

(35. मञ्जुभाषिणी)

प्रमदानुसारानिरतेन चेतसा
मदनानुकूललालितेन मोहिते ।
भवभीतिदायिगहने कृतश्रमे
मयि लक्ष्मणार्य ! कुरु वीक्षणं मनाक् ॥ ४५

प्रमिताक्षराऽपि सकलार्थशेवधिः
यतिराजसूक्तिरनघा विराजते ।
इति नाम हन्त विबुधा मुदा युताः
सततं त्वदीयपदसेवने रताः ॥ ४६

यदि नाम भीतिमुपयासि संसृतेः
यमयातनादिबहुघोरभाजनात् ।

यदुवंशनाथललितैकमग्रहृत्-
यतिबृन्दनाथपदपंकजं भज ॥ ४७

वनिताविलासरमणीयवक्षसा
वसुधातलेऽत्र बहुधा विहारिणा ।
वसुदेवदेववरदेवकीभुवा
वदतीह योऽति यतिराट् तमाश्रये । ४८

मदनेन पापसदनेन केवलं
मधुवैरिपादभजनैकवैरिणा ।
मम मानसं हि परिमोहितं हितं
महितं हिताय यतिराजमाश्रये ॥ ४९

कलिकालजातकलुषाभिभूतधीः
कमलाधिनाथहृदया प्रियोऽनिशम् ।
[1]कमलासकुक्षिकरुणाजुषाऽमुना
कलयामि नाम कमलापतिं करे ॥ ५०

यतिनायके त्रितनुदण्डमण्डिते
गुणवारिधौ निखिलपूरुषार्थदे ।

---

[1] कमला नाम यतिपतेः भगिनी ।
यस्याः वंशे जाता एते कवीश्वराः ॥

रतमानसाय नतिबृन्ददायिनी
जनता शुभं निखिलमत्र विन्दते ॥ ५१

दधिदुग्धकुन्दशरदिन्दुपाण्डरैः
दश चैकमेकमिति पुण्ड्रजालकैः ।
परिमण्डितं भजत हंसमद्भुतं
रमणीयपिङ्गशुभरेखिकायुतैः ॥ ५२

(36 प्रहर्षिणी)

उद्विग्नो भवविपिनादनेकदुःखात्
उद्धन्तुं यदि कुरुषेऽथ मित्रराजम् ।
उन्नाम्नो रविवसतेः गुणान् विवेक्तुः
उद्योगं कुरु सुहृदस्य कीर्तने त्वम् ॥ ५३

(37. मत्तमयूरम्)

काञ्चीपूर्णात् प्राप्य गिरः षट् करिशैल-
श्रीनाथप्रोक्ताः शुभदाः श्रीयतिराजः ।
आश्रित्यासौ तं च महापूर्णगुरूद्धं
हृष्टस्तस्थौ यस्तमुदारं कलयामि ॥ ५४

(38. वसन्ततिलकम्)

शैलो हि तस्य वपुरेव हरेः कथं वा
पद्भ्यां चरेयामिति कुञ्चितजानुभागः ।

आरोहणं कलयति स्म गिरेर्महान् यः
तस्यांघ्रिपद्मयुगलं शरणं प्रपद्ये ॥ ५५

मन्मौलिमण्डनमहो महिता महीयं
अस्याश्च मण्डनमिदं तव पादपद्मम् ।
तन्न्यस्तुमत्र मयि किं चकितो यतीन्द्र !
स्वामिन् ! इतीव वदति स्म गिरिश्च शेषः ॥ ५६

एतत् द्वयं समवलोक्य सपद्मनन्तः
तत्रैव वेङ्कटपतिः स्वयमाविरासीत् ।
यद्वन्दनोदितविलोचनमोदबारि-
संप्लावितस्स भगवानपि शैलराजः ॥ ५७

श्रीरङ्गराजदयितासहसंभवाय
श्रीदेवराजहृदयङ्गमनीरदाय ।
श्रीश्रीनिवासधरणीधरविग्रहाय
संपत्कुमारजनकाय नमो नमस्ते ॥ ५८

पुण्ड्रात्रिदण्डपरिमण्डितगात्रमेनं
पुण्ड्रेक्षुदण्डपरिमाण्डितगात्रमेकम् ।
पुंसोऽपि हन्त परमे पुरुषेऽनुरक्तान्
पुण्यानतीव कलयन्तमवैमि कामम् ॥ ५९

(39. अपराजिता)

यतिपतिमतकाः परैरपराजिताः
अपि यमपृतनां निजार्थमुपागताम् ।
तनुगततुलसीस्रगादिपराजितां
विदधति मयि सन्तु ते प्रसन्नाः ॥ ६०

(40. प्रहरणकलिता)

यतिपतिपदयोः नतिमिह वहतः
मतिरतिसुभगा गतिरतिपरमा ।
भगवति महती रतिरपि भविता
भवति च भवतो न हि भयकणिका ॥ ६१

(41. मालिनी)

सरलमतिगभीरं पावनं धन्यलभ्यं
मधुरतममुदारं मङ्गलं माननीयम् ।
विरतविततितथ्यं भाषितं यस्य सर्वं
स जयति यतिराजः सार्वभौमो गुरूणाम् ॥ ६२

अनुपममतिहृद्यं पावनं धन्यलभ्यं
कलिबलमललोपं कल्पकं कांक्षितानाम् ।

कमलनयनभोग्यं यद्वचो भाति सर्वं
